श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्भागवतपुराणान्तर्गतम्

# ॥ रुद्रगीतम् ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ रुद्रगीतम् ॥

श्रीरुद्र उवाच

जितं त आत्मविद्धुर्य स्वस्तये स्वस्तिरस्तु मे।
भवता राधसा राद्धं सर्वस्मा आत्मने नमः॥ १ ॥

नमः पङ्कजनाभाय भूतसूक्ष्मेन्द्रियात्मने।
वासुदेवाय शान्ताय कूटस्थाय स्वरोचिषे॥ २ ॥

सङ्कर्षणाय सूक्ष्माय दुरन्तायान्तकाय च।
नमो विश्वप्रबोधाय प्रद्युम्नायान्तरात्मने॥ ३ ॥

नमो नमोऽनिरुद्धाय हृषीकेशेन्द्रियात्मने।
नमः परमहंसाय पूर्णाय निभृतात्मने॥ ४ ॥

स्वर्गापवर्गद्वाराय नित्यं शुचिषदे नमः।
नमो हिरण्यवीर्याय चातुर्होत्राय तन्तवे॥ ५ ॥

नम ऊर्ज इषे त्रय्याः पतये यज्ञरेतसे।
तृप्तिदाय च जीवानां नमः सर्वरसात्मने॥ ६ ॥

सर्वसत्त्वात्मदेहाय विशेषाय स्थवीयसे।
नमस्त्रैलोक्यपालाय सह ओजोबलाय च॥ ७ ॥

अर्थलिङ्गाय नभसे नमोऽन्तर्बहिरात्मने।
नमः पुण्याय लोकाय अमुष्मै भूरिवर्चसे॥ ८ ॥

प्रवृत्ताय निवृत्ताय पितृदेवाय कर्मणे।
नमोऽधर्मविपाकाय मृत्यवे दुःखदाय च॥ ९ ॥

नमस्त आशिषामीश मनवे कारणात्मने।
नमो धर्माय बृहते कृष्णायाकुण्ठमेधसे।
पुरुषाय पुराणाय साङ्ख्ययोगेश्वराय च॥ १० ॥

शक्तित्रयसमेताय मीढुषेऽहङ्कृतात्मने।
चेत आकूतिरूपाय नमो वाचोविभूतये॥ ११ ॥

दर्शनं नो दिदृक्षूणां देहि भागवतार्चितम्।
रूपं प्रियतमं स्वानां सर्वेन्द्रियगुणाञ्जनम्॥ १२ ॥

स्निग्धप्रावृड्घनश्यामं सर्वसौन्दर्यसङ्ग्रहम्।
चार्वायतचतुर्बाहुं सुजातरुचिराननम्॥ १३ ॥

पद्मकोशपलाशाक्षं सुन्दरभ्रू सुनासिकम्।
सुद्विजं सुकपोलास्यं समकर्णविभूषणम्॥ १४ ॥

प्रीतिप्रहसितापाङ्गमलकैरूपशोभितम्।
लसत्पङ्कजकिञ्जल्कदुकूलं मृष्टकुण्डलम्॥ १५ ॥

स्फुरत्किरीटवलय हारनूपुरमेखलम्।
शङ्खचक्रगदापद्म मालामण्युत्तमर्द्धिमत्॥ १६ ॥

सिंहस्कन्धत्विषो बिभ्रत्सौभगग्रीवकौस्तुभम्।
श्रियानपायिन्या क्षिप्त निकषाश्मोरसोल्लसत्॥ १७ ॥

पूररेचकसंविग्न वलिवल्गुदलोदरम्।
प्रतिसङ्क्रामयद्विश्वं नाभ्यावर्तगभीरया॥ १८ ॥

श्यामश्रोण्यधिरोचिष्णु दुकूलस्वर्णमेखलम्।
समचार्वङ्घ्रिजङ्घोरु निम्नजानुसुदर्शनम्॥ १९ ॥

पदा शरत्पद्मपलाशरोचिषा
    नखद्युभिर्नोऽन्तरघं विधुन्वता।

प्रदर्शय स्वीयमपास्तसाध्वसं
पदं गुरो मार्गगुरुस्तमोजुषाम्॥ २० ॥

एतद्रूपमनुध्येयमात्मशुद्धिमभीप्सताम्।
यद्भक्तियोगोऽभयदः स्वधर्ममनुतिष्ठताम्॥ २१ ॥

भवान् भक्तिमता लभ्यो दुर्लभः सर्वदेहिनाम्।
स्वाराज्यस्याप्यभिमत एकान्तेनात्मविद्गतिः॥ २२ ॥

तं दुराराध्यमाराध्य सतामपि दुरापया।
एकान्तभक्त्या को वाञ्छेत्पादमूलं विना बहिः॥ २३ ॥

यत्र निर्विष्टमरणं कृतान्तो नाभिमन्यते।
विश्वं विध्वंसयन् वीर्यशौर्यविस्फूर्जितभ्रुवा॥ २४ ॥

क्षणार्धेनापि तुलये न स्वर्गं नापुनर्भवम्।
भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः॥ २५ ॥

अथानघाङ्घ्रेस्तव कीर्तितीर्थ यो-
रन्तर्बहिःस्नानविधूतपाप्मनाम्।
भूतेष्वनुक्रोशसुसत्त्वशीलिनां
स्यात्सङ्गमोऽनुग्रह एष नस्तव॥ २६ ॥

न यस्य चित्तं बहिरर्थविभ्रमं
तमोगुहायां च विशुद्धमाविशत्।
यद्भक्तियोगानुगृहीतमञ्जसा
मुनिर्विचष्टे ननु तत्र ते गतिम्॥ २७ ॥

यत्रेदं व्यज्यते विश्वं विश्वस्मिन्नवभाति यत्।
तत् त्वं ब्रह्म परं ज्योतिराकाशमिव विस्तृतम्॥ २८ ॥

यो माययेदं पुरुरूपयासृजद्-
बिभर्ति भूयः क्षपयत्यविक्रियः।

यद्भेदबुद्धिः सदिवात्मदुःस्थया
    तमात्मतन्त्रं भगवन् प्रतीमहि॥ २९ ॥

क्रियाकलापैरिदमेव योगिनः
    श्रद्धान्विताः साधु यजन्ति सिद्धये।
भूतेन्द्रियान्तःकरणोपलक्षितं
    वेदे च तन्त्रे च त एव कोविदाः॥ ३० ॥

त्वमेक आद्यः पुरुषः सुप्तशक्ति-
    स्तया रजःसत्त्वतमो विभिद्यते।
महानहं खं मरुदग्निवार्धराः
    सुरर्षयो भूतगणा इदं यतः॥ ३१ ॥

सृष्टं स्वशक्त्येदमनुप्रविष्ट-
    श्चतुर्विधं पुरमात्मांशकेन।
अथो विदुस्तं पुरुषं सन्तमन्त-
    र्भुङ्क्ते हृषीकैर्मधु सारघं यः॥ ३२ ॥

स एष लोकानतिचण्डवेगो
    विकर्षसि त्वं खलु कालयानः।
भूतानि भूतैरनुमेयतत्त्वो
    घनावलीर्वायुरिवाविषह्यः॥ ३३ ॥

प्रमत्तमुच्चैरिति कृत्यचिन्तया
    प्रवृद्धलोभं विषयेषु लालसम्।
त्वमप्रमत्तः सहसाभिपद्यसे
    क्षुल्लेलिहानोऽहिरिवाखुमन्तकः॥ ३४ ॥

कस्त्वत्पदाब्जं विजहाति पण्डितो
    यस्तेऽवमानव्ययमानकेतनः।
विशङ्कयास्मद्गुरुरर्चति स्म यद्-
    विनोपपत्तिं मनवश्चतुर्दश॥ ३५ ॥

अथ त्वमसि नो ब्रह्मन् परमात्मन् विपश्चिताम्।
विश्वं रुद्रभयध्वस्तमकुतश्चिद्भया गतिः॥ ३६॥

इदं जपत भद्रं वो विशुद्धा नृपनन्दनाः।
स्वधर्ममनुतिष्ठन्तो भगवत्यर्पिताशयाः॥ ३७॥

तमेवात्मानमात्मस्थं सर्वभूतेष्ववस्थितम्।
पूजयध्वं गृणन्तश्च ध्यायन्तश्चासकृद्धरिम्॥ ३८॥

योगादेशमुपासाद्य धारयन्तो मुनिव्रताः।
समाहितधियः सर्व एतदभ्यसतादृताः॥ ३९॥

इदमाह पुरास्माकं भगवान् विश्वसृक्पतिः।
भृग्वादीनामात्मजानां सिसृक्षुः संसिसृक्षताम्॥ ४०॥

ते वयं नोदिताः सर्वे प्रजासर्गे प्रजेश्वराः।
अनेन ध्वस्ततमसः सिसृक्ष्मो विविधाः प्रजाः॥ ४१॥

अथेदं नित्यदा युक्तो जपन्नवहितः पुमान्।
अचिराच्छ्रेय आप्नोति वासुदेवपरायणः॥ ४२॥

श्रेयसामिह सर्वेषां ज्ञानं निःश्रेयसं परम्।
सुखं तरति दुष्पारं ज्ञाननौर्व्यसनार्णवम्॥ ४३॥

य इमं श्रद्धया युक्तो मद्गीतं भगवत्स्तवम्।
अधीयानो दुराराध्यं हरिमाराधयत्यसौ॥ ४४॥

विन्दते पुरुषोऽमुष्माद्यद्यदिच्छत्यसत्वरम्।
मद्गीतगीतात्सुप्रीताच्छ्रेयसामेकवल्लभात्॥ ४५॥

इदं यः कल्य उत्थाय प्राञ्जलिः श्रद्धयान्वितः।
शृणुयाच्छ्रावयेन्मर्त्यो मुच्यते कर्मबन्धनैः॥ ४६॥

गीतं मयेदं नरदेवनन्दनाः
परस्य पुंसः परमात्मनः स्तवम्।

जपन्त एकाग्रधियस्तपो मह-
च्चरध्वमन्ते तत आप्स्यथेप्सितम्॥ ४७ ॥

॥ इति रुद्रगीतं संपूर्णम् ॥